अर्जुन उवाच ।

arjuna uvāca |

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।

तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥ ३.१ ॥

jyāyasī cetkarmaṇaste matā buddhirjanārdana |
tatkiṁ karmaṇi ghore māṁ niyojayasi keśava || 3.1||

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।

तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥ ३.२ ॥

vyāmiśreṇeva vākyena buddhiṁ mohayasīva me |
tadekaṁ vada niścitya yena śreyo'hamāpnuyām || 3.2||

श्रीभगवानुवाच ।

śrībhagavānuvāca |

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।

ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥ ३.३ ॥

loke'smin dvividhā niṣṭhā purā proktā mayānagha |
jñānayogena sāṅkhyānāṁ karmayogena yoginām || 3.3||

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।

न च संन्यसनादेव सिद्धिं समधिगच्छति ॥ ३.४ ॥

na karmaṇāmanārambhānnaiṣkarmyaṁ puruṣo'śnute |
na ca sannyasanādeva siddhiṁ samadhigacchati || 3.4||

न हि कश्चित्क्शणमपि जातु तिष्ठत्यकर्मकृत् ।

कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ३.५ ॥

na hi kaścitkśaṇamapi jātu tiṣṭhatyakarmakṛt |
kāryate hyavaśaḥ karma sarvaḥ prakṛtijairguṇaiḥ || 3.5||

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।

इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥ ३.६ ॥

karmendriyāṇi saṁyamya ya āste manasā smaran |
indriyārthānvimūḍhātmā mithyācāraḥ sa ucyate || 3.6||